निरिङ्गिणी, स्त्री, (निनिश्चितं यथा तथा इङ्गति प्राप्नोतीति । निर् + इङ्ग + णिनि: ततो ङीप् ।) तिरष्करिणी । तत्पर्य्याय: । अवगुण्ठिका २ पटी ३ यवनिका ४ । इति त्रिकाण्डशेष: ॥

निरिन्द्रिय:, त्रि, (निर्गतानि इन्द्रियाणि यस्मात् ।) इन्द्रियशून्य: । यथा, मनु: । ९ । २०१ ।

"अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रिया: ॥"

निरीक्षणं, क्ली, (निर् + ईक्ष + भावे ल्युट् ।) दर्शनम् । यथा,—

"द्रवात्तथान्नानिपि सेविताच
विण्मूत्रवातक्रमनिग्रहाच्च ।
वाम्याग्रहात् सूर्य्यनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषा: ॥"

इति माधवकर: ॥

(निरीक्षते इति । निर् + ईक्ष + ल्यु: । दर्शके, त्रि । यथा, भागवते । ७ । १५ । ३२ ।

"प्राणापानौ संनिरुन्ध्यात् पूरकुम्भकरेचकै: ।
यावन् मनस्त्यजेत् कामान् स्वनासाग्रनिरीक्षण: ॥")

निरीक्षितं, त्रि, (निर् + ईक्ष + क्त: ।) अवलोकितम् । यथा,—

"निरीक्षितं चाङ्गमवीक्षितश्च
दृशा मिलन्ती रभसेन तस्य ।
समानमानन्दमियं दधाना
विवेद भेदं न विदर्भसुभ्रू: ॥"

इति नैषध: ॥

निरीशं, क्ली, (निर्गता ईशा यस्मात् ।) फाल: । इत्यमर: । २ । ९ । १३ ॥ (निर्नास्ति ईश ईश्वरो यस्य ।) ईश्वरशून्ये नास्तिके च त्रि ॥

निरीषं, क्ली, (निर्गता ईषा यस्मात् । निरादय इति समास: ।) निरीशम् । इत्यमरटीकायां भरत: ॥

निरीह:, पुं, (निर्गता ईहा चेष्टा यस्मात् ।) विष्णु: । यथा,—

"निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तक: ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे चत्वारिंशन्नामकथने ७ अध्याय: ॥ ईहाशून्ये, त्रि ॥ (यथा, देवीभागवते । ४ । १० । ११ ।

"निरीह: पुरुष: कस्मात् प्रकुर्य्याद् गुह्यमीदृशम् ॥")

निरुक्तं, क्ली, (निनिश्चयेन उक्तम् ।) वेदवेदाङ्गशास्त्रविशेष: । यथा,—

"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषन्तथा ।
छन्दश्चेति षडङ्गानि वेदानां वैदिका विदु: ॥"

इति शब्दरत्नावली ॥

(तथाहि,—

"वर्णागमो वर्णविपर्य्ययश्च
द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योग-
स्तदुच्यते पञ्चविधं निरुक्तम् ॥"

यदुक्तं देवराजयज्वना निर्व्वचने, तद्यथा,—

"अत उक्ताध्ययनविधेरुक्तच्छन्द:प्रविभागस्योक्तविनियोगस्योपलक्षितकर्म्माङ्गभूतकालस्योपदर्शितलक्षणस्यैतेरङ्गैर्व्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते । प्रधानञ्चेदमितरेभ्योऽङ्गेभ्य: सर्व्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानम् । तद्गुण: शब्द: । स चेतरेषु व्याकरणादिषु चिन्त्यते । कल्पे खल्वपि विनियोगश्चिन्त्यते । स च पुनरर्थाभिधानवशेन मन्त्राणाम् । यो यमर्थमभिधानेन संस्कर्त्तुं समर्थो मन्त्र: स तत्र विनियुज्यते । तदुक्तं अर्थाभिधानसंयोगान्मन्त्रेषु शेषभाव: स्यात् इति । न च निरुक्तादितेऽन्यदङ्गमन्यद्वा वाक्यं शास्त्रमस्ति तात्पर्य्येण यदशेषान् शब्दान् निर्ब्रूयात् । यदपि च क्वचित् क्वचिदन्यशास्त्रे शब्दनिर्व्वचनम् । अतएव तदिह्युपलक्षणम् । यथा शब्दलक्षणपरिज्ञानं सर्व्वशास्त्रेषु व्याकरणात् एवं शब्दार्थनिर्व्वचनपरिज्ञानं निरुक्तात् । वस्तुमात्रमेव हि इतरेषु शास्त्रेषु स्वाभिमतबुद्धिविषयमेव किञ्चिच्चिन्त्यते ब्राह्मणमपि च विध्यर्थवादरूपमशेषमन्त्रार्थशेषभूतमेव । मन्त्रब्राह्मणार्थपरिज्ञानवहत्वाध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्म्मार्थकाममोक्षाख्योऽखिलपुरुषार्थ: । न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति । तस्मादर्थपरिज्ञानाभिनिवेशादिदमेव प्रधानमित्युपपन्नम् । अथास्यैवमखिलपुरुषार्थोपकारवृत्तिसमर्थस्य संग्रह: । तद्यथा,—

नामाख्यातोपसर्गनिपातलक्षणम् । भावविकारलक्षणम् । नामान्याख्यातजानि सर्व्वाणि च यथोपपन्नस्य पक्षप्रतिपक्षतो विचार्य्यावधारणम् । सर्व्वाण्याख्यातजानि कानिचिदेवानेक-धातुजान्यपीति मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्त्वावधारणम् । पदविभागपरिज्ञानप्रतिज्ञानबोधावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदैवतलिङ्गसङ्कटेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण दैवतपरिज्ञानप्रतिज्ञा । अर्थज्ञप्रशंसा । अनर्थज्ञावधारणम् । वेदवेदाङ्गव्यूह: । सप्रयोजननिघण्टुसमाम्नायविरचनम् । प्रकरणत्रयविभागेन नैघण्टुकप्रधानदैवताभिधानप्रविभागलक्षणम् । निर्व्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेश: । अर्थप्राधान्यात् लोपोपधाविकारवर्णलोपविपर्य्ययोपदेशेन साम्यर्थोपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपविपर्य्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदाहरणचिन्ता । अन्तस्थान्तर्द्धातुनिमित्तेन सम्प्रसार्य्यासम्प्रसार्य्योभयप्रकृतिधातुनिर्व्वचनोपदेश: । भाविकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धि: । नैगमप्रायोवृत्तिभ्यो भाविकशब्दार्थप्रसिद्धि: । देशव्यवस्थया शब्दरूपव्यपदेश: । तद्धितसमासनामनिर्व्वचनलक्षणम् । शिष्यलक्षणम् । विशेषेण व्याख्यया तत्पर्य्यायमिदमसङ्गासन्दिग्धोदाहरणनिर्व्वचनव्यवस्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणम् । अनेकार्थानवगतसंस्कारानुक्रमणम् । परोक्षकृताध्यात्मिकमन्त्रलक्षणम् । स्तुत्याशी:शपथाभिशापाभिख्यापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्यक्तिहेतूपदेश: । निदानपरिज्ञानव्याख्यापजायानादिष्टदैवतोपपरीक्षणायाध्यात्मोपदेशप्रकृतिभूमत्वम् । इतरेतरजन्मत्वम् । स्थानत्रयभेदत: तिसृणामेकैकस्या माहाभाग्यकृतोऽनेकनामधेयप्रतिलम्भ: । पृथगभिधानस्तुतिपक्षिसम्बन्धाद्वा । दैवतानामाकारचिन्तनम् । भक्तिसाहचर्य्यसंस्तवकर्म्महविर्भाक्छन्दोभाजनानि । पृथिव्यन्तरिक्षद्युस्थानदैवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यश्चतदुदाहरणम् । तन्निर्व्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय दैवतप्रकरणनिर्णय: । विद्यापारम्पर्य्योपायोपदेश: । मन्त्रार्थनिर्व्वचनद्वारेण दैवताभिधाननिर्व्वचनफलं दैवताताख्यानम् । इत्येव समासतो निरुक्तशास्त्रचिन्ताविषय: ॥"*॥

"वर्णागमो वर्णविपर्य्ययश्च इत्यादिना निश्चयेनोक्तं निरुक्तम् ।" इत्यमरटीकायां भरत: ॥ पदभञ्जनम् । यथा,—

"प्रस्तावस्तु प्रकरणं निरुक्तं पदभञ्जनम् ॥"

इति हेमचन्द्र: ॥

कथिते, त्रि । यथा । "निरुक्ता प्रकृतिर्द्विधा ।" इति जगदीश: ॥

निरुद्ध:, त्रि, (नि + रुध + क्त: ।) संरुद्ध: । रोधविशिष्ट: । इति अनिरुद्धशब्दटीकायां भरत: ॥ (यथा, देवीभागवते । ३ । २६ । ३५ ।

"मया निरुद्ध: पापात्मा पतितोऽहं न्धये पुन: ॥")

निरुद्धप्रक(का)श:, पुं, मेढ्रजातक्षुद्ररोगविशेष: । तल्लक्षणमाह ।

"वातोपसृष्टे मेढ्रे तु चर्म्म संश्रयते मणिम् ।
मणिश्चर्म्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च ॥
निरुद्धप्रकशे तस्मिन्मन्दधारमवेदनम् ।
मूत्रं प्रवर्त्तते जन्तोर्म्मणिर्विव्रियते न च ॥
निरुद्धप्रकशं विन्द्यात् सरुजं वातसम्भवम् ।
निरुद्धप्रकाश इत्यस्य स्थाने निरुद्धप्रकशपदमार्षत्वात् ॥ * ॥

अथ तस्य चिकित्सा ।

"निरुद्धप्रकशे नाडीं लौहीमुभयतोमुखीम् ।
दारवीं वा जतुकृतां घृताक्तां संप्रवेशयेत् ॥
परिषिञ्चेद्वसां मज्जां शिशुमारवराहयो: ।
चक्रतैलं तथा योज्यं वातघ्नद्रव्यसंयुतम् ॥
त्र्यहात् स्थूलतरां सम्यक् नाडीं गर्भे प्रवेशयेत् ।
स्रोतो विवर्द्धयेदेव स्निग्धमन्नञ्च भोजयेत् ॥
भित्त्वा वा सेवनीं मुक्त्वा सद्य: क्षतवदाचरेत् ।"

इति भावप्रकाश: ॥

निरुद्योग:, त्रि, (निर्नास्ति उद्योगो यस्य ।) निरुद्यम: । उद्योगाभावविशिष्ट: । (यथा, भागवते । ८ । ८ । २९ ।

"नि:सत्त्वा लोलुपा राजन् ! निरुद्योगागतत्रपा: ।
यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवा: ॥")